www.rtmnuonline.com

**NKT/KS/17/4287-A**

**Bachelor of Commerce (B.Com.) Part–I Semester–I Examination**

**SANSKRIT (Other Language)**

**(Compulsory)**

835

समयः– होरात्रयम्] [पूर्णाङ्काः – 80

**सूचना :—** विशेषनिर्देशाभावे उत्तराणि स्वीकृत माध्यमेन लिखत :

1. अनुवादं कुरुत :

तापॅसी-सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व।

बालः – (सदृष्टिक्षेपम्) कुत्र वा मम माता ?

उभे – नामसादृश्येन वञ्चितो मातृवत्सलः।

द्वितीया – वत्स, 'अस्य मृत्तिकामयूरस्य रम्यत्वं पश्य' इति भणितोऽसि।

राजा – (आत्मगतम्) किंवा शकुन्तलेत्यस्य मातुराख्या ? सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नायमत्र प्रस्तावो मे विषादाय कल्पेत ?

**अथवा**

लवः – (सकौतुकापराधविनयम्) आर्याः पश्यत। एभिर्नीतोऽस्मि। (इति त्वरितं परिक्रमति)

जनकः– अतीव मे कौतुकं वर्तते। भगवति अरुन्धति, सखि कौत्सल्ये स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः। (इति निष्क्रान्तो वृद्धवर्गः। प्रविशन्ति बटवः)

बटवः– पश्यतु कुमारस्तावदाश्चर्यम्।

लवः – दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः।

बटवः– कथं ज्ञायते ? 5

2. अनुवादं कुरुत :

वाच्यतां समयोऽतीतः स्पष्टमग्रे भविष्यति।
इति पाठ्यतां ग्रन्थे काठिन्यं कुत्र वर्तते।।
गृहिणी स्वजनं वक्ति शुष्काहारं मिताशनम्
पतिपक्ष्यांस्तु बह्वाशान् क्षीरपांस्तस्करानपि

**अथवा**

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके
वाञ्छन् देशमनातपं विधिवशात् तालस्य मूलं गतः।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनम्।। 5



www.rtmnuonline.com

www.rtmnuonline.com

3. ससन्दर्भं स्पष्टीकरणं लिखत:

(अ) श्रद्धया देयम्।

**अथवा**

अहो निर्दयता दूरात्मनां पौराणाम्। 5

(ब) अतीयात्सागरो वेलां न प्रतिज्ञामहं पितु:।

**अथवा**

सतां मैत्री पुनस्त्वीदृशी। 5

4. कथां लिखत :

इन्द्रिय कथा **अथवा** सहाय: क्षेमकारक:। 10

5. 'कलिविडम्बनम्' इति पाठे कविना वर्णितान् कलियुगस्य दोषान् विवेचयत।

**अथवा**

'कौत्सस्य गुर्वर्थप्राप्ति: इति पाठस्याधारेण कौत्स: रघुं प्रति किमर्थम् आगत: ? रघुणा तस्य इच्छा कथं पूरिता इति सविस्तरं लिखत। 10

6. निम्नलिखितं परिच्छेदं पठित्वा उत्तराणि **संस्कृतभाषया** लिखत :

अथा अध्वनि तेषां पञ्चानामपि पल्लीपुरमध्ये व्रजतां ध्वाङ्क्षा: कथयितुमारब्धा:। रे रे किराता धावत धावत। सपादलक्षधनिनो यान्ति। एतान्निहत्य धनं नयत। तत: किरातैर्ध्वाङ्क्षवचनमाकर्ण्य सत्वरं गत्वा ते विप्रा लगुडप्रहारैर्नजरीकृत्य वस्त्राणि मोचयित्वा विलोकिता: परं धनं किञ्चिन्न लब्धम्।

(i) ते कति जना: आसन् ?

(ii) 'रे रे किराता: धावत घावत' इति के कथयितुम् आरब्धा: ?

(iii) ध्वाङ्क्षै: किरातेभ्य: का सूचना प्रदत्ता ?

(iv) तदा किरातै: किं कृतम् ?

(v) अस्य पाठस्य नाम किम् ? 5

7. निम्नलिखितं पद्यपरिच्छेदं पठित्वा उत्तराणि **संस्कृतभाषाया** लिखत :

पापान्निवारयति योजयते हिताय<br>
गुह्यं च गूहति गुणान् प्रकटीकरोति।<br>
आपद्गतं न च जहाति ददाति काले<br>
सन्मित्रलक्षणमिदं प्रवदन्ति सन्त:।।

(i) क: पापान्निवारयति ?

(ii) सन्मित्रं किं गूहति ?

(iii) सन्मित्रं किं प्रकटीकरोति ?

(iv) क: काले ददाति ?

(v) सन्मित्रस्य इदं लक्षणं के प्रवदन्ति ? 5



www.rtmnuonline.com

www.rtmnuonline.com

8. उचितपयायैः रिक्तस्थानानि पूरयत :

(i) रामायणं ______ काण्डेषु विभक्तमस्ति। (पञ्च, अष्ट, सप्त)

(ii) शकुन्तलायाः आख्यानं ______ अस्ति। (रामायणे, महाभारते, भागवते)

(iii) भासनाटकचक्रे _______ नाटकानि सन्ति। (13, 14, 15)

(iv) बुद्धचरितम् इति महाकाव्यम् _______ रचितवान्। (भारविः, अश्वघोषः, कालिदासः)

(v) कालिदासस्य _______ इति खण्डकाव्यं लोकप्रियम्। (ऋतुसंहारम्, मेघदूतम्, काकदूतम)

5

9. **द्वयोः** स्तम्भयोः मेलनं कुरुत :

| अ | ब |
|---|---|
| (i) शिष्यानुशासनम् | (i) उत्तररामचरितम् |
| (ii) चित्तैकाग्रयम् | (ii) नीलकण्ठदीक्षितः |
| (iii) कुमारलवस्य वीररसावेशः | (iii) तैत्तिरीय उपनिषद् |
| (iv) राम भरतयोः संवाद | (iv) महाभारतम् |
| (v) कलिविडम्बनम् | (v) रामायणम् |

5

10. टिप्पणीः लिखत :

(i) व्यासः

(ii) भासः

(iii) सुश्रुतः

(iv) वाग्भटः। 20



www.rtmnuonline.com